**Roll Number** | | | | | | |

**SET-1**

*Candidates must write the Set No. on the title page of the answer book.*

# DAV PUBLIC SCHOOLS, ODISHA ZONE

## PERIODIC ASSESSMENT - II ( 2023-24)

- Please check that this question paper contains **10** printed pages.
- Set number given on the right hand side of the question paper should be written on the title page of the answer book by the candidate.
- Check that this question paper contains **18** questions.
- Write down the Serial Number of the question in the left side of the margin before attempting it.
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed 15 minutes prior to the commencement of the examination. The students will read the question paper only and will not write any answer on the answer script during this period.

## CLASS –X
## SUB: SANSKRIT

**Max. Marks: 80** **Time Allowed:3Hours**

**General Instructions:**

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।
3. प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. खण्डसंख्या अपि लेखनीया |

**खण्ड: - 'क'**

**(अपठित - अवबोधनम्)**

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **(10)**

रामायणं लौकिकसंस्कृतस्य प्रथमः ग्रन्थः मन्यते | अस्मिन् ग्रन्थे मर्यादा पुरुषोत्तमस्य रामचन्द्रस्य जीवनस्य वृत्तान्तं वर्तते | अस्य लेखकः महर्षिः वाल्मीकिः आसीत् | सः आदिकविः अपि कथ्यते | अस्य रचना 'आदिकाव्यम्' इति विद्वांसः मन्यन्ते | इदं काव्यम् अनुष्टुप् छन्दसि निबद्धम् अस्ति | अस्मिन् (ग्रन्थे) महाकाव्ये चतुर्विंशतिसहस्र-श्लोकाः सन्ति | अनेन रामायणं 'चतुर्विंशति-साहस्री संहिता' इति नाम्ना अपि प्रसिद्धम् अस्ति | अस्य भाषा अति सरला मधुरा च अस्ति | रामायणे कविना यत् वर्णनं कृतं तत् सर्वत्र अलौकिकम् अस्ति | महर्षिः वाल्मीकिः श्री रामस्य वर्णनम् अवताररूपे न कृत्वा केवलं मर्यादा पुरुषोत्तमरूपे कृतवान् |

**I.** एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (1×2=2)

**(i)** लौकिकसंस्कृतस्य प्रथमः ग्रन्थः कः **?**

**(ii)** आदिकविः कः आसीत् **?**

**(iii)** रामायणे कति श्लोकाः सन्ति **?**

**II.** पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (2×2=4)

**(i)** रामायणे कस्य जीवनस्य वृत्तान्तं वर्तते **?**

**(ii)** रामायणं केन नाम्ना प्रसिद्धम् अस्ति **?**

**(iii)** अयं ग्रन्थः कस्मिन् छन्दसि निबद्धः अस्ति **?**

**III.** गद्यांशस्य उचितं शीर्षकं लिखत। (1)

**IV.** यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्) (1×3=3)

**(i)** " अस्य रचना 'आदिकाव्यम्' इति विद्वांसः मन्यन्ते " अस्मिन् वाक्ये क्रियापदं किम् अस्ति**?**

**(a)** आसीत् **(b)** आदिकाव्यम् **(c )** मन्यन्ते **(d)** रचना

**(ii)** " जटिला " इति पदस्य विलोमपदं गद्यांशे किम् प्रयुक्तम् **?**

**(a)** मधुरा **(b)** सरला **(c )** संहिता **(d)** मर्यादा

**(iii)** 'प्रथमः ग्रन्थः' अत्र विशेष्यपदं किम् **?**

**(a)** प्रथमः **(b)** ग्रन्थः **(c)** रामायणं **(d)** मन्यते

**(iv)** 'कृतवान्' इति क्रियाया**:** कर्तृपदं किम् **?**

**(a)** वाल्मीकिः **(b)** मर्यादा **(c)** पुरुषोत्तमः **(d)** रामस्य

**खण्डः- 'ख'**

**(रचनात्मककार्यम् ) अङ्काः- 15**

2. भवान् देवदत्तः | भवतां विद्यालये संस्कृतसप्ताहः समायोजितः | तत्र संस्कृत-सम्भाषणप्रतियोगितायां भवता प्रथमः पुरस्कारः प्राप्तः | तत् सूचयता भवता स्वमित्रं सुदीप्तं प्रति लिखिते पत्रे मञ्जूषापद-सहायतया रिक्तस्थानानि पूरयित्वा पुनः पत्रं लिखत | – **(½ ×10 = 5)**

छात्रावासतः

(i)...........

तिथिः-

प्रियमित्र (ii)............ !

सस्नेहं (iii) .......... |

अत्र वयं सर्वे कुशलिनः | अस्माकं विद्यालये गतसप्ताहे संस्कृतसप्ताहः (iv) ......... अभवत् | तत्र एका सम्भाषणप्रतियोगिता अपि (v) ............ | अहं तस्यां (vi) ............. प्रथमपुरस्कारं प्राप्तवान् | संस्कृतसम्भाषणेन (vii) ................ आत्मविश्वासः जागृतः अभवत् | इदानीम् अहं संस्कृते एव (viii) ........ | भवान् अपि तथा प्रयत्नं कुर्यात् | पितृभ्यां नमोनमः |

(ix) .........अभिन्नमित्रम्

(x) ........

**मञ्जूषा- [ नमोनमः, वदामि, सुदीप्त, दिल्लीतः, अभवत्, मम, भवतः, आयोजितः, देवदत्तः, प्रतियोगितायां ]**

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत । (1×5=5)



**(मञ्जूषा- स्वच्छता अभियानम् , राजधानी , प्रदूषणम् , मार्जनं , अस्वच्छता , दूरीकरणीया ,भवनानि , दिल्लीनगरं , कर्मचारिणः ,मार्जन्या ,त्रयः)**

अथवा

मञ्जूषायाः सहायतया 'पर्यटनम्' इति विषयस्य उपरि पञ्च संस्कृतवाक्यानि लिखत -

(मञ्जूषा- रोमाञ्चकारि, सुखदायि च, भवति, जनानां, मनोरञ्जनं, मानसिकीं शान्तिं, क्षमतायाः वृद्धिः, व्यापारोन्नतिः, पर्यटन-उद्योगः, समृद्धः अभवत् )

4. अधोलिखितां कथां मञ्जूषातः शब्दान् चित्वा उचितशब्दैः पूरयत – **(½ ×10 = 5)**

एकः निर्धनः जनः आसीत् | तस्य (1) .......... महाविद्यालये पठितुम् इच्छति स्म | अतः सः जनः (2) ......... कृत्वा स्वल्पम् अर्थं सञ्चितवान् तथा च स्वपुत्रं महाविद्यालये (3) .......... दापयितुं सफलः अभवत् | पुत्रः अपि (4) ........ निवसन् अध्ययने संलग्नः अभवत् | परन्तु (5) ......... दैवगतिः | तत्र स्थित्वा एव सः पुत्रः (6) ........... अभवत् | पिता पुत्रस्य अस्वस्थता-विषये ज्ञात्वा (7)......... अभवत् | अर्थाभावेन पीडितः पिता (8) .......... गन्तुं येन केन प्रकारेण यत्नं कृतवान् | अर्थव्यवस्थां कृत्वा छात्रावासं प्रति (9)......... | सत्यं कथ्यते यत् – पुत्रवात्सल्यम् (10).......... |

| **मञ्जूषा- विचित्रा , अतुलनीयम् , पुत्रः , व्याकुलः , परिश्रमं ,छात्रावासे , पुत्रसमीपं, प्राचलत् , प्रवेशं , अस्वस्थः** |
|---|

अथवा

अधोलिखितं संवादं पठित्वा उचितवाक्यैः शून्यस्थानं पूरयत - (1 ×5 = 5)

जनकः - पुत्रः केशव ! (i) ---------------- ?

पुत्रः - हे जनक ! अहं गीतां पठामि ।

जनकः - शोभनम्, गीता इति बहु उत्तमः ग्रन्थः अस्ति । गीता महाभारतस्य भागः अस्ति, यस्मिन् सप्तशत-श्लोकाः सन्ति ।

पुत्रः - आम् (ii) ----------------- ।

जनकः -सत्यम् । किं त्वं जानासि यत् महाभारतस्य लेखकः कः अस्ति ?

पुत्रः - आम्,जनक ! (iii) -------------------- ।

जनकः -उत्तमम् , संस्कृतस्य प्रसिद्धौ ग्रन्थौ कौ ?

पुत्रः - अहं मन्ये, (iv) ----------------------- ।

जनकः - सत्यम् , त्वं बहु जानासि । अहं बहु प्रसन्नः अस्मि ।

पुत्रः - धन्यवादः पितः ! (v) -------------------------- ।

**मञ्जूषा**

- अस्य लेखकः महर्षिः वेदव्यासः अस्ति ।
- त्वम् एतावद्-ध्यानेन किं पठसि?
- अहं पठामि अतः जानामि ।
- एतौ प्रसिद्धौ ग्रन्थौ रामायणं महाभारतं च स्तः ।
- एतेषु श्लोकेषु श्रीकृष्णस्य ज्ञानवर्धकाः उपदेशाः सन्ति ।

**खण्डः- 'ग'**

**(अनुप्रयुक्त-व्याकरणम्) 25 अङ्का:**

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत- (केवलं प्रश्नचतुष्टयम्) **(1×4= 4)**

**(i)** अयं कोशः **<u>कोऽपि</u>** अपूर्वः विद्यते।

**(ii)** **<u>पदच्छेद</u>**: तु सुस्वरः।

**(iii)** शक्रः **<u>तत्रैव</u>** अन्तर्हितः अभवत्।

**(iv)** रमणीया हि **<u>सृष्टिरेषा</u>** जगत्पतेः।

**(v)** **<u>इत्युक्त्वा</u>** स राजा वैद्योक्तविधिना याचकाय चक्षुः समर्पितवान्।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत--(केवलं प्रश्नचतुष्टयम्) **(1×4= 4)**

**(i)** नास्ति **<u>त्यागसमं</u>** सुखम् |

क) त्यागात् समं  ख) त्यागाय समं  ग) त्यागेन समं  घ) त्यागस्य समं

**(ii)** नृपः नगरम् परितः **<u>दानशालाः</u>** अकारयत्।

क) दानस्य शाला  ख) दानेन शाला  ग) दाने शाला  घ) दानाय शाला

**(iii)** **<u>पिककाकौ</u>** कूजतः |

क) पिकः च काकः च तयोः समाहारः  ख) पिकाः च काकाः च

ग) पिकः च काकः च  घ) पिकम् च काकम् च

**(iv)** वानराणां **<u>यूथपः</u>** सर्वान् वानरान् अवदत् |

क) यूथस्य पतिः  ख) यूथं पाति इति  ग) यूथं पिबति इति  घ) यूथे पतिः इति

**(v)** मेध्यम् **<u>अमेध्यं</u>** सर्वमेव भक्षयति।

क) न मेध्यम्  ख) अ मेध्यम्  ग) मेध्यस्य अभावः  घ) मेध्यम् अ

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) **(1×4= 4)**

(i) प्रकृतेः **<u>रमणीय + तल्</u>** मनोरमा अस्ति।

(क) रमणीयः  (ख) रमणीयता  (ग) रमणीया  (घ) रमणीयम्

(ii) **<u>भगवान्</u>** बोधिसत्त्वः शिवीनां राजा अभवत्।

(क) भग + मतुप्  (ख) भग + मत्  (ग) भग + वान्  (घ) भग + मान्

(iii) **<u>संस्कृता</u>** वाणी पुरुषं समलङ्करोति।

(क) संस्कार + टाप्  (ख) संस्कारी + टाप्  (ग) संस्कृत + टाप्  (घ) संस्कृति + टाप्

(iv) विद्यालयस्य प्राङ्गणे भवतां **हृद + ठक्** स्वागतम् ।

(क) हार्दिकः (ख) हार्दिकी (ग) हार्दिकम् (घ) हार्दिकेन

(v) रङ्गमञ्चे नटः **नटी** च प्रविशतः ।

(क) नट + मतुप् (ख) नट + त्व (ग) नट + तल् (घ) नट + ङीप्

8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पूरयत । (1×3= 3)

**श्यामः** – सोहन ! किं त्वं पत्रालयं (i)............. ?

**सोहनः** - न, (ii)..............तु स्वपाठः स्मर्यते |

**श्यामः** - शोभनम् ! अधुना त्वया निबन्धः (iii)...............किम् ?

**सोहनः** - आम् (iv)....... अधुना निबन्धं लिखामि |

**मञ्जूषा-** अहम् , लिख्यते, मया, गच्छसि

9. कालबोधकशब्दैः अधोलिखित-दिनचर्चां पूरयत-(केवलं प्रश्नत्रयम्) **(1×3= 3)**

**(i)** शिल्पिका प्रातः **(7:15)**------------- प्रातराशं कृत्वा विद्यालयं गच्छति।

**(ii)** विद्यालयात् मध्याह्ने **(1:30)**---------- गृहम् आगत्य भोजनं खादति ।

**(iii)** सायं **(5:45)**----------- सा अन्याभिः बालिकाभिः सह खेलति ।

**(iv)** सा **(9:00)**----------- भोजनं करोति ।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः रिक्तस्थानानि पूरयत -(केवलं प्रश्नचतुष्टयम्) **(1×4= 4)**

**(i)** ईश्वरः -------- करोति शोभनमेव करोति ।

**(ii)** विद्यां विना जीवनम् --------- भवति ।

**(iii)** भो बालकाः! यूयम् -------- गच्छथ **?**

**(iv)** ------ दशरथः नाम नृपः आसीत् ।

**(v)** सिंहः ------- गर्जति ।

**(मञ्जूषा- उच्चैः, यत्, कुत्र, पुरा,वृथा )**

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - (केवलं प्रश्नत्रयम्)

**(1×3= 3)**

**(i)** जन्तुशालायाम् अनेके **सिंहः** आसन् ।

क) सिंहाः ख) सिंहे ग) सिंहानाम् घ) सिंहेषु

**(ii)** तत्र वानराः अपि **कूर्दति** ।

क) कूर्दतः ख) कूर्दन्ति ग) कूर्दसि घ) कूर्दन्ते

**(iii)** श्वः अस्माकं परीक्षा **<u>अभवत्</u>** |

क) भविष्यति    ख) भवति    ग) भवतु    घ) अभवः

**(iv)** एते मम **<u>मित्राः</u>** सन्ति ।

क) मित्रे    ख) मित्र**:**    ग) मित्राणि    घ) मित्रम्

**खण्डः - 'घ'**

**(पठित-अवबोधनम्) 30 अङ्काः**

12. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत **-**

अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत् । स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत् । जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म | कारुण्य- औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत् । तत्र अर्थिनां समूहः अन्न-पान- वसन-रजत- सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत् । राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म ।

**I.एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**    **(½ ×2 = 1)**

(क) कः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत् ?

(ख) सः कस्य समन्ततः दानशालाः अकारयत् ?

(ग) केषां समूहः सन्तुष्टः अभवत् ?

**II.. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयं)**    **(1×2=2)**

(क) बोधिसत्व कीदृशः आसीत् ?

(ख) अर्थीनां समूहः कानि प्राप्य सन्तुष्टः अभवत् ?

(ग) सः प्रजाः कथं पालयति स्म ?

**III. यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्)**    **(1×2=2)**

(क)"दानशाला:" इति पदस्य किं विशेषणपदम् ?

(ख)"आयान्ति स्म" इति क्रियापदस्य किं कर्तृपदम् ?

(ग) 'श्रुत्वा' इति पदस्य समानार्थकपदम् अत्र किं प्रयुक्तम् ?

13. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत **–**

अपूर्व**:** कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।।

**I.** एकपदेन उत्तरत **-** (केवलं प्रश्नद्वयम्)    **(½ ×2 = 1)**

(क) सरस्वत्या**:** कोश**:** कीदृशः अस्ति **?**

(ख) सरस्वत्या**:** कोश**:** कथं वृद्धिमायाति **?**

(ग) सरस्वत्या**:** कोश**:** सञ्चयात् किम् आयाति **?**

**II.** पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (1×2=2)

(क) कस्याः कोश: अपूर्व: अस्ति ?

(ख) सरस्वत्या: कोश: कथं क्षयमायाति ?

(ग) सरस्वत्या: कोश: व्ययतो किम् आयाति ?

**III.** यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) (1×2=2)

(क) " वृद्धिम् " इति पदस्य किं विलोमपदम् श्लोके अस्ति ?

(ख) " सरस्वति" इति पदस्य किं पर्यायपदं श्लोके अस्ति ?

(ग) "अपूर्व: कोऽपि कोशोऽयं विद्यते तव भारति" अस्मिन् श्लोकांशे क्रियापदं किम् अस्ति ?

14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

काक:- (प्रविश्य,सक्रोधम्) आ: किम् उक्तवती भवती ? यदि अहं कृष्णवर्ण: तर्हि श्रीरामस्य वर्ण: कीदृश: ? श्रीवासुदेवस्य वर्ण: कीदृश: ? मुग्धे ! अहं तु अतीव कर्तव्यपरायण: । प्रभाते 'का-का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि ।

राजहंस:- हुं ! किमनेन ? एतत् कार्यं तु कुक्कुटोऽपि करोति ।

काक:- (विहस्य) कुक्कुट: | अरे अद्य कुत: कुक्कुटा: नगरेषु । अहमेव सर्वत्र सुलभ: ।

राजहंस:- भो: भो: वाचाल ! स्वीयै: कटुभि: क्वणितै: जगजागरणात् अन्यत् तु किमपि न करोषि ।

**I.** एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(½ ×2 = 1)**

(क) काकस्य वर्ण: कीदृश: ?

(ख) अद्य कुक्कुटा: कुत्र न दृश्यन्ते ?

(ग) क: कर्तव्यपरायण: ?

**II.** पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (1×2=2)

(क) काक: कथं सुप्तान् जनान् प्रभाते प्रबोधयति ?

(ख) क: सर्वत्र सुलभ: वर्तते ?

(ग) प्रदत्तनाट्यांशस्य अन्ते राजहंस: किं वदति ?

**III.** यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) (1×2=2)

(क) संवादे 'दुर्लभ:'इति अस्य विलोमपदं किम् ?

(ख) 'एतत् कार्यं तु कुक्कुटोऽपि करोति'- अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम् ?

(ग) 'कटुभि: क्वणितै:' अनयो: विशेषणपदं किम्?

**15.** अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -(केवलं पञ्चप्रश्ना:) (1×5=5)

क) **सत्येन** समं सुखम् नास्ति ।

ख) राजा **याचकेभ्य:** दानं ददाति स्म ।

ग) एषा सृष्टि: **<u>रमणीया</u>** अस्ति।

घ) मयूरस्य नृत्यं **<u>प्रकृते:</u>** आराधना।

ङ) सूर्योदये **<u>तम:</u>** नश्यति।

च) **<u>मनस:</u>** निग्रह**:** वायो**:** इव कठिन**:**।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुन**:** लिखत- **(½ ×4 = 2)**

**नास्ति विद्यासमं चक्षु: नास्ति सत्यसमं तप:।**
**नास्ति रागसमं दु:खं नास्ति त्यागसमं सुखम्।।**

**अन्वय:** - (1) _______ चक्षु**:** नास्ति, सत्यसमं (2) _______ नास्ति। रागसमं दु**:**खं (3) _______, त्यागसमं (4) ______ नास्ति।

**(मञ्जूषा- नास्ति,सुखम्,विद्यासमं,तप:)**

अथवा

**मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य भावार्थं पूरयित्वा पुन: लिखत-** **(½ ×4 = 2)**

**असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।**

**भावार्थ:-** हे महाबाहो **!** अत्र संशय**:** नास्ति यत् एतत् (1) ....................... अतीव चञ्चलम् अस्ति। इदं (2) ............. नियन्त्रितं भवति परन्तु यदि वयं पुन**:** पुन**:** (3) ........... कुर्म**:**, विरक्ता**:** च भवाम**:** तदा निश्चयेन एतत् वशीकर्तुं (4) ............. |

**(मञ्जूषा- बहुकष्टेन,अभ्यासम्,शक्नुम:, मन:)**

17. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं विकल्पेभ्य**:** चिनुत-
(केवलं प्रश्नचतुष्टयम्) **(1×4=4)**

क) काकस्य **<u>गात्रं</u>** यदि काञ्चनस्य तथापि सः काकः एव ।

i) गोत्रम् ii) शरीरम् iii) नेत्रम् iv) कुटुम्बम्

**ख)** आपत्काले सरोवरं त्यक्त्वा दूरं **<u>व्रजसि</u>**।

i) खादसि ii) पठसि iii) गच्छसि iv) नमसि

ग) **<u>अमात्या:</u>** अवदन्।

**i)** सेवका**:** **ii)** मन्त्रिण**:** **iii)** द्वारपाल**:** **iv)** सैनिका**:**

घ) **<u>अनृतं</u>** वदसि चेत् काक**:** दशेत्।

**i)** सत्यम् **ii)** मधुरम् **iii)** कटु**:** **iv)** असत्यम्

ङ) केन **<u>प्रयुक्त:</u>** पुरुष**:** पापं चरति।

**i)** प्रेरित**:** **ii)** युक्त**:** **iii)** प्रसिद्ध**:** **iv)** प्रकटित**:**

**18.** मञ्जूषायां प्रदत्तपदेभ्यः समुचितपदं चित्वा अधोलिखितकथां पूरयत - **(½ ×8 = 4)**

एकदा भगवान् बोधिसत्वः (1)....... राजा अभवत् | सः महान् दानी , विनयशीलः ,वृद्धोपसेवी च (2).......... | तस्य दानशीलतां श्रुत्वा (3)........ देशेभ्योऽपि जनाः तस्य देशम् आयन्ति स्म | एकदा शक्रः अपि तस्य (4) .............. परीक्षितुम् आगच्छत् | सः नेत्रहीनयाचक-रूपेण आगत्य तं राजानम् एकं (5) ......... अयाचत | राजा तस्मै चक्षुर्द्वयमेव प्रायच्छत् | प्रसन्नः (6) ........... कतिपयदिनेभ्यः पश्चात् पुनः राज्ञः पुरतः उपस्थितः अभवत् | सः राज्ञः त्यागवृत्तिं प्रशंसन् नेत्रद्वयमपि प्रत्यस्थापयत् | अपि च शतयोजनपर्यन्तं (7)........... पारं द्रष्टुं समर्थः भव इति तस्मै वरम् अयच्छत् | उच्यते अपि – नास्ति त्यागसमं (8) ............. |

**मञ्जूषा- [ आसीत् , शिवीनाम् , सुखम् , शैलानां, अन्येभ्यः , दानशीलतां , शक्रः , नेत्रम् ]**